ॐ

# उचितसमये एव उचितकार्यं कुरु

## लघुरूपकम्

रचकः रामुलु गजवाड Rāmulu Gajavāḍa Saṇskṛtam Teacher

पात्रधाराः

| | |
|---|---|
| कृष्णाचार्यः | विद्यालये संस्कृत अध्यापकः |
| पद्मलोचनः | सुरेशस्य सङ्गीत अध्यापकः |
| सुनीति | रमेशस्य माता |
| नलिनी | सुरेशस्य माता |
| रमेशः | छात्रः |
| सुरेशः | छात्रः |
| मोहमद् महोदयः | छात्रः |
| नारायणः | छात्रः |
| महामदः | छात्रः |
| जानकी | छात्रा |
| लता | छात्रा |

प्रथमभागः।

**रमेशः** ---- रमेशः सुरेशस्य गृहाग्रे तिष्ठन् वदति। भोः सुरेश इदानीम् सायंकाले पञ्चवादनमस्ति। मया सह आगच्छतु। आवां क्रीडाङ्गे कन्दुकेन खेलावः।

**नलिनी** ---- सुरेशस्य माता नलिनी द्वारं उद्घाटयति।
हे रमेश इदानीम्  सुरशः गृहे नास्ति। त्वं गृहं गच्छ।
रमेशः सुरेशस्य गृहस्य पृष्ठं गच्छति गवाक्षेण सुरेशं पश्यति। सुरेशः अध्यापकेन सह वीणाभ्यासं करोति। सुरशः रमेशं पश्यति।

**सुरेशः** ---- भोः रमेश गच्छतु। इदानीम्  अहं वीणाभ्यासं करोमि। श्वः विद्यालये कक्ष्यायां मेलिष्यावः।

**नलिनी** ---- सुरेशस्य माता नलिनी रमेशं पश्यति। हे रमेश मम गृहं मा आगच्छ। भवान्  विद्याभ्यासं कदापि करोति वा। भवान् सर्वदा क्रीडाविषये  एव चिन्तयति। अहं भवतः मातरं भवतः विषये कथयिष्यामि।

**द्वितीयभागः**

**विद्यालये संस्कृतकक्षायां अध्यापकः कृष्णाचार्यः** ---- सुप्रभातम्। अद्य कक्षायां के के उपस्थिताः ?

**छात्राः ----** अहं रमेशः उपस्थितोस्मि। अहं सुरेशः उपस्थितोस्मि । अहं गोविन्दः उपस्थितोस्मि । अहं नारायणः उपस्थितोस्मि। अहं महमद् महोदयः उपस्थितोस्मि। अहं जानकी उपस्थितोस्मि। अहं लता उपस्थितोस्मि।

**कृष्णाचार्यः अध्यापकः ----** सम्यक् अस्ति। आरम्भे अहं " ॐ सहनाववतु " इति श्लोकं पठामि भवन्तः सर्वे अनुपठन्तु

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै।
**ॐ शान्तिः शान्तिः शन्तिः**

**अध्यापकः ---साधु साधु। अतीव सन्तुष्टोस्मि।** आङ्ग्लभाषायां अनुवादं करोमि।

सहनाववतु May He protect us both. Teacher and the taught.

सहनौ भुनक्तु May He nourish us both.

सहवीर्यं करवावहै May we both be vigorous do work with strength.

तेजस्विनावधीतमस्तु May our study bright with intelligence.

माविद्विषावहै May there be no misunderstading and hatered between us.

अद्य वयम्  आदिकवि वाल्मीकेः रचित रामायणस्य विषये चर्चां कुर्मः। तदनन्तरं कालिदास्य विषये चर्चां कुर्मः। परथमतः अहं एकं श्लोकं पठामि ततः सर्वे अनुपठन्तु।

कूजन्तं रामरामेति मधुरं मधुराक्षरम्।
आरुह्य कविता शाखां वन्दे वाल्मिकिकोकिलम्॥

**कूजन्तं** singing. **राम राम इति** Thus: Rāma Rāma. **मधुरं** melodious. **मधुराक्षरं** sweet words. **आरुह्य** having climbed. **कविता शाखां** branch of the poetry **वन्दे** I salute. **वाल्मिकि कोलिं** Vālimiki the nightingale.

I salute Sage Vālmiki the nightingale of poets, the who having climbed the the branch of poetry melodiously sings, sweet words Rāma Rāma.

**अध्यापकः** ----ह्यः परीक्षायां रमेश प्रथमस्थानं प्राप्तवान्। प्रतिपरीक्षायां भवान् प्रथमस्थाने  एव भवति। रमेश अतीव प्रस्सन्नोस्म। अभिनन्दनानि।

तृतीयभागः

**सुरेशः** -- मातः रमेशः कक्ष्यायाः परीक्षायां प्रथमस्थानं प्राप्तवान्।

सुरेशस्य माता **नलिनी** -- रमेषः कदापि न पठति,  सदा कन्दुकेन खेलितुं एव चिन्तयति। किमर्थं परीक्षायां प्रथमस्थानं प्राप्तवान्।

**सुरेशः --** मातः तत् सत्यं नास्ति। अहं रमेशं तस्य मात्रा सहितं भोजनार्थं निमन्त्रितवान्। अद्य सायंकाले तौ अस्माकं गृहं आगमिष्यतः।

चतुर्तः भागः

रात्रौ सुरेशस्य गृहे **सुरेशः ---** रमेश नमस्कारः भवान् कथं अस्ति। मातः भवती कथं अस्ति।

**नलिनी---** सुनीति नमस्कारः भवती कथं अस्ति ?

**सुनीती---** अहं कुशलमस्मि भवती कुशलं वा ?

**रमेशः ---** अद्य कन्दुकखेलनं अतीव आह्लादकरं आसीत्।

**सुरेशः ---** अद्य सायंकाले कन्दुकक्रीडा सम्यक् आसीत्।

**नलिनी ----**सुनीति महोदये रमेशः कदापि पाठान् न पठति। सः प्रतिदिने किं करोति?

**सुनीति ----** रमेश भवतः दिनचर्यां सुरेशस्य मातरं विस्तारेण कथयतु।

**रमेशः ----** प्रातः पञ्चवादने शयनात् उत्तिष्ठामि। सार्ध पञ्चवादनपर्यन्तं शौचगृहे मुखक्षालनं दन्तक्षालनं इत्यादीनि कार्याणि करोमि। तदनतरं सार्ध पञ्च वादनतः

षट्वादन पर्यन्तं योगासनाभ्यासं करोमि। षट्वादने स्नानं करोमि। तदनन्तरं ध्यानं करोमि च वेदपठनाभ्यासं पाठशालायां पठितपाठान् पठामि। अष्टवादने भोजनं करोमि। सार्ध अष्टवादने विद्यालयं गच्छामि। सायंकाले पञ्च वादनतः षट्वादनपर्यन्तं क्रीडाङ्गणे कन्दुकेन खेलामि। षट्वादने भोजनं स्वीकरोमि। अष्टवादनतः नववादनपर्यन्तं मुरलीवादनाभ्यासं करोमि। नववादने विद्यालयस्य गृहकार्यं करोमि। पुस्तकानि पठामि। तदनन्तरं निद्रां करोमि।

उद्यमेन हि सिध्यन्ति कार्याणि नमनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥ १

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र दैवं सहायकृत्॥ २

सुरेशः प्रतिदिनं सर्वाणि कार्याणि उद्यमेन अपि उचितसमये करोति। ततः सः प्रति प्रीक्षायां प्रथम स्थानं प्राप्नोति।॥